संस्कृतवार्ता:

08.06.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· केन्द्रीय-नवीन-सर्वकारस्य श्व: भावमानस्य प्रतिज्ञा-ग्रहण-समारोहस्य सज्जता प्रचुरतया।

· शपथ – ग्रहण – समारोहे भागं ग्रहीतुं निकटवर्तिनां देशानां विभिन्ना: नेतार: आमन्त्रिता:।

· निर्वाचनआयोगेन जम्मू-कश्मीरस्य विधानसभायां सामान्यनिर्वाचनाय सामान्यचिंह्ानां आवंटनाय राजनैतिकदलानां आवेदनानि स्वीकृतानि।

· राष्ट्रपति: द्रौपदी मुर्मु: प्रधानमन्त्री नरेन्द्र मोदी च रामो जी रावस्य निधने शोकं प्रकटितवन्तौ।

· आईसीसी पुरुष टी-ट्वेंटी(विंशति) क्रिकेट – विश्व – चषके बांग्लादेश श्रीलङ्का पराजितवान् अफगानिस्तान: न्यूजीलैण्ड पराजितवान्।

<u>प्रधानमन्त्रि शपथ-ग्रहरण-समारोह:</u>

केन्द्रीय नवीनं-सर्वकारस्य श्व: भावमानस्य प्रतिज्ञा-ग्रहण-समारोहस्य सज्जता प्रचुरताया जायते। राष्ट्रपति: द्रौपदी मुर्मु: एन०डी०ए० संसद्-दलस्य-नेतारं नरेन्द्र-मोदिनं नवीन-सर्वकारस्य निर्माणाय आमन्त्रितवती। शपथ-ग्रहण-समारोह: श्व: सायं पञ्चदशकलोत्तर-सप्तवादने राष्ट्रपति-भवनस्य प्रांगणे भविता। राष्ट्रपति: द्रौपदी मुर्मु: श्रीनरेन्द्र-मोदिनं तस्य मन्त्रि-परिषद सदस्यान् च पदस्य गोपनीयतायाश्च शपथं दापायिष्यति। श्रीमोदी ह्य: राष्ट्रपतिना सह मेलनं कृतवान् नवीन-सर्वकार-निर्माणस्य च प्रस्तावं प्रस्तुतवान्।

राष्ट्रपति-भवनात् बहि: मोदी न्यगदत् यत् राष्टिर्य-जनतान्तिर्क – गठबंधन्धनमिति दलं सुदृढं स्थिरं विकासोन्मुखं च सर्वकारं निर्मास्थति श्रीमोदिना उक्तं यत् जना: राष्ट्रिय-जनतान्त्रिक-गठबन्धनमित्यस्मै एकं अवसारं दत्तवन्त:, अपि च एतत् अष्टादशम-लोकसभा नवीनानां यूनां च ऊर्जाया: स्रोत: अस्ति। विदेश-मंत्रालयेन सूचितं यत् श्रीलंकाया: राष्ट्रपति: रानिल-विक्रमसिंघे, मालदीवस्य राष्ट्रपति: डॉ० मोहम्मद-मुइज्जू:, सेशेल्सस्य उप-राष्ट्रपति: अहमद-अफीफ, बांग्लादेशस्य प्रधानमंत्री शेख-हसीना, मॉरिशस् देशस्य प्रधानमंत्री प्रविन्द कुमार जुगनौथ: नेपालस्य प्रधानमन्त्री पुष्प-कमल-दहल: ‘प्रचण्ड’ भूटानस्य च प्रधानमन्त्री शेरिंग टोब्गे इमे सर्वेऽपि समारोहे भागं ग्रहीष्यन्ति। एते नेतार: अस्माकं संवाददातृभि:, सूचितं यत् श्री नरेन्द्र-मोदी

तृतीय वारं प्रधानमन्त्रि पदस्य शपथ – ग्रहण – समारोहे भागं ग्रहीतुं निकलवर्तिनां देशानां विभिन्ना: नेतार: आमन्त्रिता:।

निर्वाचन आयोग

निर्वाचनआयोगेन जम्मू-कश्मीरस्य विधानसभायां सामान्यनिर्वाचनाय सामान्यचिंह्नानां आवंटनं याचमानानां राजनैतिकदलानां आवेदनानि तत्कालं प्रभावेण स्वीकृतुं निर्णयः नीतः। सर्वोच्चन्यायालयेन गतदिसम्बरमासे निर्वाचनायोगाय निर्देशः दत्तः आसीत् यत् अस्मिन् वर्षे सितम्बर मासस्य त्रिंशत दिनांकपर्यन्तं जम्मू-कश्मीरे विधानसभानिर्वाचनं भवतु। पञ्जीकर्तृणां अमान्यदलानां निर्वाचनाय अभ्यर्थिनः स्थापयितुं सामान्यचिह्नस्य कृते आवेदनं कर्तव्यं भवति।

शोक

राष्ट्रपति: द्रौपदी मुर्मु: प्रधानमन्त्री नरेन्द्र मोदी च रामो जी रावस्य निधने शोकं प्रकटितवन्तौ पद्मविभूषणेन सम्मानितस्य राबस्य दृष्टिकोण: - सामाजिक-उत्थाने निहित: आसीत्। ईनाडू-समूहस्य संस्थापकस्य वार्ता-समवायस्य सुविख्यातस्य रामोजीरावस्य अद्य प्रात: हैदराबादे निधनं जातम्। स: सप्ताशीतिवर्षीय: आसीत्।

कांग्रेस

कांग्रेसदलस्य कार्य-समिते: उपवेशनं राजधान्यां नवदिल्ल्यां सम्पन्नम्। उपवेशने कांग्रेसदलाध्यक्ष: मल्लिकार्जुन खरगे, वरिष्ठा: दलनेतार: सोनिया गांधी, राहुल गांधी, दल-महासचिवा प्रियंका गांधी वाड्रा, दलस्य अन्ये नेतारश्च उपस्थिता:।

ओडिसा

उडिसायां सोमवासरे भारतीय-जनता-पार्टीति-दलस्य-प्रथम-मुख्यमन्त्रिण: शपथ-ग्रहण-समारोहस्य ज्जता संचलति। तद्दिने प्रात: भजपाविधानमण्डल – दलस्य उपवेशनं भविता।

तेलगु-देशम-दलस्य

तेलगु-देशम – दलस्य राष्ट्रिय: अध्यक्ष: चन्द्रबाबू नायडू: जून मासस्य द्वादश दिनाङ्के सप्तविंशति कलोत्तर - एकादश – वादने आंध्र प्रदेशस्य मुख्यमन्त्रिपदस्य शपथं स्वीकरिष्यति। समारोह: विजयवाडाया: समीपे भविता। श्री नायडू: चतुर्थं वारं राज्यस्य मुख्यमन्त्री भविष्यति।

एनटीए- नीट् :

राष्ट्रियपरीक्षासमवायेन, एनटीए इत्यनेन उक्तं यत् राष्ट्रियपात्रता-सह-प्रवेशपरीक्षायाः (NEET-UG) चतुर्विंशत्यधिक द्वि सहस्रेत्यस्य सम्पूर्णा प्रक्रिया अतीव पारदर्शिनी अभवत् तथा च सम्पूर्णे देशे परीक्षायाः अखण्डतायाः कृते प्रमादः नाभवत्। परीक्षा मे-मासस्य पञ्चमे दिनाङ्के अभवत्, अस्य मासस्य चतुर्थे दिनाङ्के परिणामः घोषितः। अभ्यर्थिनः उत्थापितानां विषयाणां विषये नव दिल्ल्यां वार्ताहरान् सम्बोधयन् एन.टी.ए. महानिदेशकः सुबोधकुमारसिंहः अवदत् यत् परिक्षा प्रश्नपत्रस्य पूर्वप्रसारः नाभवत्। सः अवदत् यत्, नीट् परीक्षासम्बद्धः विषयः षट् केन्द्रैः, षोडश-शताभ्यर्थिभिः च सम्बद्धः अस्ति येषां प्रश्नपत्रस्य अनुचितवितरणस्य कारणेन समयः नष्टः जातः। सः अवदत् यत्, एनटीए इत्यनेन एतेषां षोडशशत् जनानां समस्यानां विश्लेषणार्थं उच्चस्तरीयसमित्याः घटनं कृता अस्ति।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: श्व:/अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे श्रोतुं प्रभवन्ति। भवति, आशासे भवन्त: प्रति रविवासरं श्रोष्यन्तीति।

आईसीसी पुरुष टी-ट्वेंटी(विंशति) क्रिकेट

आईसीसी पुरुष टी-ट्वेंटी(विंशति) क्रिकेट – विश्व – चषके बांग्लादेश श्रीलङ्का पराजितवान् अफगानिस्तान: न्यूजीलैण्ड पराजितवान्।
आईसीसी क्रिकेट-पुरुष-विंशति-विंशति-विश्व-चषके अमरीकाया: टेक्सास इत्यत्र बांग्लादेश दलं श्रीलंकादलं द्वि क्रीडकपुरस्सरं पराजितवत्। अपरस्यां स्पर्धायाम् अफगानिस्तान दलेन न्यूजीलैण्डदलं चतुरशीतिधवनांकै पराजितम्।

फ्रेंच – ओपन

फ्रेंच – ओपन – टूर्नामेंट – स्पर्धा – श्रृड्खलायां: महिलैकान्त्यचक्रे पोलैण्डस्य इगा स्वियातेक: इटलीदेशीया च जैस्मीन पाओलिनी स्पर्धिष्येते। पुरुषैकल अन्त्यें श्व: स्पेन – देशस्य कार्लोस अलकराज: जर्मन्या: अलेक्जेंडर – ज्वेरेवं सम्मुखीकरिष्यति।

एफआईएच हॉकी

लंदने एफआईएच हॉकी प्रो-लीग इत्यत्र अद्य भारतं जर्मनीं सम्मुखीकरिष्यति। अस्मात् प्राक् भारतेन जर्मनी-दलं त्रि-शून्य – अङ्कै: पराजितम्।

।। इति वार्ता: ।।